# Shri Ganesha Stuti Gritsamadakrita

# ગૃત્સમદકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Gritsamadakrita

File name : gaNeshastutiHgRRitsamadakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 36 | 5.36. 1-40||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 4, 2024

*sanskritdocuments.org*

# ગૃત્સમદકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।

નમસ્તે બ્રહ્મણાં નાથ બ્રહ્મણાં બ્રહ્મરૂપિણે ।

બ્રહ્મણસ્પતયે તુભ્યં ગણેશાય નમો નમઃ ॥ ૧॥

જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં જ્યેષ્ઠપદપ્રદાયિને ।

જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપાય સર્વપૂજ્યાય તે નમઃ ॥ ૨॥

કર્તૄણાં કતૃરૂપાય કવયે કવિનાયક ।

કર્તૃભ્યઃ કર્તૃદાત્રે વૈ કવિરાજાય તે નમઃ ॥ ૩॥

જગત્સુ બ્રહ્મસુ પ્રાજ્ઞ નાનાભોગકરાય તે ।

ઉપમાન્નપ્રભોક્ત્રે તુ બ્રહ્મભોક્ત્રે નમો નમઃ ॥ ૪॥

સદા મોહયુતાયૈવ મોહમોહકરાય તે ।

જીવાય બૃહતાં નાથાય બૃહસ્પતયે નમઃ ॥ ૫॥

સદા બ્રહ્મસુખસ્થાય પરમાત્મસ્વરૂપિણે ।

ગુહાહિતાય સાઙ્ખ્યાય બૃહસ્પતિસખાય તે ॥ ૬॥

સ્વસંવેદ્યમયાયૈવ સ્વાનન્દે યોગધારિણે ।

જીવાનાં બ્રહ્મણાં સંયોગાય તે વૈ નમો નમઃ ॥ ૭॥

સત્યાયાયોગરૂપાય મનોવાણીવિવર્જિત ।

ભદ્રાણાં ભદ્રકાયૈવ સત્યસત્યાય તે નમઃ ॥ ૮॥

સર્વેષાં પોષકાયૈવ સોમાયામૃતરૂપિણે ।

સોમાનાં સોમદાત્રે તે પુષ્ટિનાથાય તે નમઃ ॥ ૯॥

ઉત્તિષ્ઠત્સૃષ્ટિકર્ત્રે તે પાલકાય હરાય ચ ।

ત્રયીમયાય તૂર્યાય તૂર્યાતીતાય તે નમઃ ॥ ૧૦॥

ઇન્દ્રાદિદેવતાનાં વૈ સહાયાય નમો નમઃ ।

ધર્મપાલકભાવાય ધર્માધીશાય તે નમઃ ॥ ૧૧॥

સર્વેષાં રાજ્યદાત્રે વૈ રાજ્યરાજાય તે નમઃ ।

અરાજ્યાય પરેશાય સંસારાર્ણવતારિણે ॥ ૧૨॥
યોગેભ્યો યોગદાત્રે ચ યોગયોગાય તે નમઃ ।
શાન્તિદાય સદા શાન્તિસ્થાય તત્પતયે નમઃ ॥ ૧૩॥
ઇત્યાદિ ભેદા બહવો બ્રહ્મણો વેદવાદતઃ ।
તેષાં સ્વામિસ્વરૂપાય બ્રહ્મણે તે નમો નમઃ ॥ ૧૪॥
કિં સ્તૌમિ ગણનાથ ત્વાં બ્રહ્મણસ્પતિરૂપિણમ્ ।
ભવ પ્રસન્નો બ્રહ્મેશ કૃપયા તે નમો નમઃ ॥ ૧૫॥
એવં ગૃત્સમદઃ સ્તુત્વા ગણેશાનં મહીપતે ।
હર્ષેણોત્ફુલ્લનયનો નનર્ત પ્રેમવિહ્વલઃ ॥ ૧૬॥
દૃષ્ટ્વા તં ગણરાજસ્તુ જગાદ ઘનનિસ્વનઃ ।
વરં મત્તસ્ત્વં વરયાધુના સ્તોત્રેણ તોષિતઃ ॥ ૧૭॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
ભવિષ્યતિ ન સન્દેહો મમ ભક્તિવિવર્ધનમ્ ॥ ૧૮॥
સદા શાન્તિમયો ભૂત્વા માં ભજિષ્યસિ માનદ ।
ત્વયા કૃતેન સ્તોત્રેણ બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૧૯॥
પુત્રપૌત્રાદિકં સર્વં ધનધાન્યાદિવર્ધનમ્ ।
પ્રભવિષ્યતિ પાઠેન શ્રવણેન મુનેઽસ્ય તુ ॥ ૨૦॥
તસ્ય તદ્વચનં શ્રુત્વા સાવધાનો બભૂવ હ ।
નિયમ્ય હર્ષમુગ્રં સ પ્રણનામ ગજાનનમ્ ॥ ૨૧॥
ઉવાચ વિસ્ખલદ્વાક્યો મુનિર્ગૃત્સમદો મહાન્ ।
ગણેશં ભક્તિસંયુક્તો ભક્તરાજેશ્વરઃ સ્વયમ્ ॥ ૨૨॥
ગૃત્સમદ ઉવાચ ।
ધન્યૌ મે જનકૌ નાથ જન્મ ધન્યં તપો વયઃ ।
વિદ્યા વ્રતાદિકં સર્વં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૨૩॥
અહો સાક્ષાદ્ગણેશાનો બ્રહ્મેન્દ્રો દૃષ્ટિમાગતઃ ।
મનોવાણીવિહીનો ન તાભ્યાં યુક્તો ન વૈ ભવાન્ ॥ ૨૪॥
એતાદૃશં ગણેશાનં દૃષ્ટ્વા ત્વાં કિં વૃણોમ્યહમ્ ।
તથાપિ વરયામિ ત્વાં ત્વદાજ્ઞાપાલનાર્થતઃ ॥ ૨૫॥
બ્રહ્મભૂતાશ્ચ વેદેષુ બ્રાહ્મણાઃ કથિતા બુધૈઃ ।
અતો માં બ્રાહ્મણં નાથ કુરુ યોગીન્દ્ર વન્દ્યકમ્ ॥ ૨૬॥
યથા ત્વં બ્રહ્મણાં નાથસ્તથાઽહં બ્રહ્મભૂયિનામ્ ।
નાથો ભવામિ વિઘ્નેશ યોગીન્દ્રાણાં ગુરોર્ગુરુઃ ॥ ૨૭॥

ત્વદીયપાદપદ્મે વૈ ભક્તિં દેહિ ગજાનન ।
સુદૃઢાં ગાણપત્યેષુ સઙ્ગં દેહિ સદા ચ મે ॥ ૨૮॥
ગાણપત્યેષુ વિખ્યાતં માં કુરુષ્વ વિશેષતઃ ।
ગૃત્સમદસમો નાસ્તિ ગાણપત્યસ્વભાવધૃક્ ॥ ૨૯॥
એવમુક્ત્વા ગણેશાનં પ્રણનામ મહામુનિઃ ।
તમુવાચ ગણેશાનો ભક્તિં દૃષ્ટ્વા મહાદ્ભુતામ્ ॥ ૩૦॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
ગણાનાં ત્વેતિ મન્ત્રસ્ય જપઃ ખલુ કૃતસ્ત્વયા ।
સૂક્તસ્યાપિ તથા મે વૈ તત્ર મુખ્યો ભવિષ્યસિ ॥ ૩૧॥
ઋષિર્ભવ મહાભાગ ગણાનાં ત્વાસ્ય મન્ત્રતઃ ।
સૂક્તસ્યાપિ વિશેષેણ બ્રાહ્મણેન્દ્રો ભવાપિ તુ ॥ ૩૨॥
આદાવૃષેશ્ચ યજ્ઞાદૌ સ્મરણં તે કરિષ્યતિ ।
પશ્ચાન્ મે દેવતાયાશ્ચ મુખ્યો ભવ મદીયકે ॥ ૩૩॥
ન ત્વત્સમો ભવેત્ કુત્ર મદ્ભક્તેષુ મહામુને ।
માનયિષ્યન્તિ વિપ્રાસ્ત્વામત્રિમુખ્યા ન સંશયઃ ॥ ૩૪॥
ત્વદીયસ્મરણં નાસ્તિ મન્ત્રે વૈદિકગે ચ મે ।
ગણાનાં ત્વા જપિષ્યન્તિ ફલહીના ભવન્તુ તે ॥ ૩૫॥
શિવવિષ્ણ્વાદયો દેવા બ્રહ્માદ્યા બ્રાહ્મણા નરાઃ ।
શેષાદ્યાશ્ચાસુરાદ્યાશ્ચ ત્વાં નમસ્યન્તિ નિત્યદા ॥ ૩૬॥
ત્વદીયાવજ્ઞયા ક્રુદ્ધો દહિષ્યામિ ચરાચરમ્ ।
ત્વદીયહૃદયે નિત્યં સ્થાસ્યામિ ભક્તિલોલુપઃ ॥ ૩૭॥
ત્વયા યત્ર તપસ્તપ્તં તદેવ ક્ષેત્રમુત્તમમ્ ।
ભવિષ્યતિ મદીયં વૈ પુષ્પકં સર્વસિદ્ધિદમ્ ॥ ૩૮॥
ભુક્તિં મુક્તિં બ્રહ્મભૂયં ભક્તિં પુષ્ણાતિ માનદ ।
તેન ક્ષેત્રં સમાખ્યાતં પુષ્પકં મત્સમાશ્રિતમ્ ॥ ૩૯॥
યદ્યચ્ચિન્તયસિ પ્રાજ્ઞ તત્તત્તે સફલં ભવેત્ ।
સ્મરણેન મહાકાર્યે પ્રત્યક્ષોઽહં ભવામિ ચ ॥ ૪૦॥

ઇતિ ગૃત્સમદકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૩૬ । ૫.૩૬। ૧-૪૦॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 36 . 5.36. 1-40..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Gritsamadakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*